तदनंतरंचप्राप्तां॥तदद्भुतरूपदेहस्थितिः तयासहस्वामिसरस्तीरक्षणमासीनः॥तांविगलितवेद्यांतरांमकरोत्॥
तदनु॥लक्ष्मीकरकमललालितलीलैःपार्वत्यास्नानार्थमाहूतः॥स्नानपीठमारुरोह॥तदाकश्चिदवसरपाठकःपपा
ठ॥घनीभूतैःस्नेहैःप्रथममभिलिप्याकुलसद्गंधाद्रवीभूतैर्लिप्तंतदनुरमणंसाकृतवती॥कुंदस्थैःस्फुरस्नातंस्फुरसन्निकरे
श्चित्रमथनाकटाहस्थैःस्नातंहिमगिरितनूजाकृयतितं॥७॥तत्रकाचनभीमसेनतनुरिवोत्क्षिप्तघटा॥काच॰विंध्याटवीवमहा
करिराकागजपंक्तिरिवमदोदकधाराकलिता॥काश्चिच्चकोरीवनिशोल्लसितचंद्रजीवना॥काश्चित्त्रयीपीतनुवकुंकुमरक्त
कमलोद्भासितकरा॥काश्चिद्दिक्षुचक्षाणिधृतकमला॥देववनिताजनतास्नापयांबभूव॥अथाकल्पादिभिरास्मानंसत्कृत्य
॥शमीशमीमानीयस्थापितनांदिः॥नारायणपुराभिगमनमंगलंस्विकारदेवः॥ततश्च॥शुभयोगनक्षत्रयुजि॥मुदितपद्मा
वतीकुटुंबि॥मुदितलोकाशंभुभुजि॥दिवसेवामभागेवक्रेषुचलसताकलधौतवर्णनसरस्वतीपंचकेनयुक्तःहंसयानःपु
रतः॥चंद्रवर्णाचहीनमालोऽशिवावुत्तरतः॥गजेंद्रगमनोदक्षिणतःशच्चीपुरंदरौ॥शरजातकीर्तिकलितौवरुणस्कंदौ

पश्चिमतः॥यथातु॥अन्येपियथायोग्यंनिर्जरहृदयानंदकंथौरतिमन्मथौच॥ज्येष्ठाषाढौज्वलौपुनर्वसूद्दुग्स्थितौसूर्यस्कंधाकौरौ
५१ च॥मदिष्टदायीनमदिष्टदायीरसानुकूलोनरसानुकूलः॥लसस्वरूपोनलसस्वरूपोमध्येययौताक्ष्यरथःसलक्ष्मीः॥८॥
एवंक्रमेणनजानाभिरामंकतिचित्स्थानमतिक्रम्यचकपिलेश्वरं॥सुवर्णमुखरीतिख्यातांशुकाभिधानांव्यक्तिदृष्ट्वानंदींचत्ती
र्थं॥महाकल्पसदृशेनचैवाह्निकजनेनकेनचिद्दिवसेनचसामोदंप्राप्यनारायणपुरबाह्योद्यानपुष्पवाटिकाप्रदेशं॥दृष्ट्वाच
वियद्भूमिपालं॥ज्ञातेचान्योन्यपटवासप्रक्षेपव्यापारे॥आसस्येवपुराणरामख्यातस्य॥कुसुमस्येवमहाविटपालिश्रय
स्य॥मरोरिवनगललामस्य॥सुकृतिनइवमहाच्छायाश्रितेः॥सुकुलत्रस्येवदृष्टत्रासवस्य॥समरांगणस्येवतेनस्ततःपत्
द्धालीकरवस्य॥सुरेश्वरस्येवसहस्रनेत्रस्य॥चैत्यरसालद्रुमस्यालवालेक्षणमासीनः॥पद्मावत्याःविहाररविनोदनार्थंकल्पि
तमंदिरमध्यवासः॥तदनुमरालकस्तमुवाच॥पाकस्थानंहिरण्यस्थलमथचमधोरुत्सवस्थानमेतत्प्रह्लादस्थानमेतत्कु ५१
विवस्वतिरिर्यंशंबरस्थानमेतत्॥भात्येवंगेहमेतत्पुनरसुरमणीसात्कृतंतादृशंचाप्याश्चर्यंश्री॥निवासप्रभुवरविबुधोत्त

सते मोदहेतुः ॥ ९ ॥ किंच ॥ एषा देव्याः धरायाः प्रसारभूमिः चेटीमल्लिकानामा मन्सुखेन विशालयति येयं ॥ भवत्संबंधिनो ये
वाहिकाः यथायोग्यं तत्तत्स्थानेषु स्थापिताः ॥ तथाहि ॥ मेषवृषभादयो गोष्ठे ॥ भर्तृदारिकाकंठे नक्षत्रमाला ॥ रंभादयः प्रम
दवने ॥ कविबुधकलानिधयः सुधाधौतप्रासादेषु ॥ सौधाग्रे केतुः ॥ मंदः सभायां बहिर्देशे ॥ भुजंगा वल्लीनरेंद्रभवने ॥ अन्ये सर्वे
पि सुमनोगणाः बाह्योपवने ॥ अपि तु ॥ धनुःशस्त्रशालायां स्थाप्यमधाने वा ॥ तारा आंगिरस्य निकटं प्रापणीया चंद्रस्य वा ॥ दैवेन
सह आगतः सविताचस्कंदेवो वा सूर्यो वेति चेत्तु भिक्षामीति ॥ देवोप्यनाकर्णितकेन वयस्य मरालकुकुदाश्रियामाविरमेत् ॥ प्रहस्त
पीडने योग्यो नूनं कुंभप्रभाहरः ॥ कुचाभोगः सरोजाक्ष्याः हर्तुं मामिव राजते ॥ १० ॥ प्रियकामिन्तसौंदर्यविलसत्तारकेक्षणं ॥ पुनः
पश्यामि नु हृत्कं चंद्रबिंबमिवोल्लसत् ॥ ११ ॥ इति चिंतयन्नेव तान्विशामस्पने पीतं ॥ एवं स्थिते ॥ श्रितकमलवंदेषु मिलिंदेषु कथं क
थमपि प्रियचाटुवचनपरिपारीनिधकचवस्निग्धासु मुग्धासु ॥ अन्यांगनालिंगनचिह्नदर्शनं कोपसंजातकटुवचनमंडितासु
॥ खंडितासु ॥ उषःसंचारिजनदर्शनचकितचकिततारकासु अभिसारिकासु ॥ कामिमिथुनमनोरथग्रहणसुधेषु कू

जघ्नरणायुधेषु॥ आप्रातःकालजागरूकश्वशुररदंतधावनसमयकृतनिष्ठीवनेषु पांसुलाजनेषु॥ भक्ष्यभ्रमोत्सुकमा

५२ नशेफाचलवामरेष्वपि खर्वंडितगृहजयसनेषु॥ महाराष्ट्रसैनिकेष्वपि आकुलीकृतकुर्तलेषु॥ बालापत्यिनकुक्कुमेष्वपि

पुनर्खांकितदंतेषु॥ अपुरोभागस्थितमंत्रिजनसल्लापपरवग्दशावदनेष्वपि पश्चात्तापितकंठमालेषु॥ याम्यजनितपा

लच्छिकृतशुकेष्वपि वर्किंचिन्मालिनपत्रेषु॥ बहुव्यापारव्ययवणिक्जनेष्वपि अक्रमेवेष्टितनीवीषु॥ मखभंगकुपितेंद्रेष्वपि

मुक्तपयोधरबंधेषु॥ नलकूबरेष्वपि दंतदष्टरंभोरुषु॥ नमुचिशूलघातदूनगजेंद्रेष्वपि आयस्तकटेषु॥ निर्मुक्तेष्वपि मु

क्तकंचुकेषु॥ कौस्तुभेष्वपि मनोज्ञमणिनोल्लसितेषु॥ वेनेष्वपि गलितांगरागेषु॥ अप्रगल्भकाव्येष्वपि विभ्रष्टालंका

रेषु॥ तरुणीजनेषु॥ वारुणीमनोविलासेष्वपि अनुभूयमानशेषस्फुरंतस्फुरत्वेषु॥ जातेजगन्मंगले प्रभातसमये क

स्मिंश्चिद्राजमंत्रिणि समागत्य कृतमंगलस्नानेन देवेन भवितव्यं॥ अयमयं त्वरयति देवः कल्याणमंडपिकाप्रवेशा ५२

य विययन्महीपालः सूर्यश्चेति वदति॥ श्रीनिवासस्तु तथा कृत्वा स्वयमेवागत्य राज्ञा आकारितः सभां प्रविवेश॥ त

त्रं वैवाहिकानां परस्परं परिहासपेशलाः वाचः प्रसरंतिस्म ॥ तथाहि ॥ कन्यापक्षगाः स्त्रियः ॥ भुजंगाहिनमानसे वारुणि
कुंकुमेन सकुरुफालं ॥ पितामहाश्लेषरसिके सरस्वति हरिद्रया लिप्तौ कुरु चकुंभौ ॥ चंडि पार्वति पुरो भव ॥ गुरुरूढपयो
धरे तारे स्वीकुरु स्त्रीटिकां ॥ तापसहिता लिंगे व अरुधति आसने उपविश ॥ इति तथा च वरपक्षगाः वनिताः ॥ पीडितः स्त
नभारेण तव पीनपयोधरे ॥ धरे वियन्महीपालः सिद्धार्थो भूभृदप्यभूत् ॥ ११ ॥ कांचनप्रति ॥ स्कप्रलंवस्त्र निर्दत एहि ॥ मातं
गगामिनि किं ब्रूहि ॥ दोषाकरे मुखिकस्थेयं ॥ अधरलसद्रागे श्यांतासि इति ॥ अथ तस्मिन्व्यतिकरे ॥ त्र्यप्यं तैर्यदवर्णियन्नवितु
धैराश्चापि यत्तापसैरध्यापि व्रजयस्त्रवीभिरनिशं चाश्लेषि यत्संभ्रमात् ॥ यच्चालं विसमुद्रराजसुतया प्याराधि महेशकैस्त
च्चाक्षालि पदं वियन्नृपतिना कन्याप्रदानोत्सवे ॥ १२ ॥ किंच ॥ अंगुष्ठस्य दशाननो नखमणेर्ब्रह्मांडभांडक्षितिः स्वर्णस्य प्रणतेः
कृपाधुतनयः संकुंदनस्योरगः ॥ यानायाः पितरो घृलोकतटिनी पांसोर्महत्वं विदुर्यस्य श्रीचरणस्य तं नृपवरः प्रक्षाल्य ध
न्योभवत् ॥ १३ ॥ नरस्तु वस्त्राभरणादिभिरभ्यर्च्य ॥ कार्तांतिकैरावेदिते समये राजकन्यां दातुमुद्यतः ॥ कन्यावरयोर्व्यजा

भिवापरेमंतरपटीं धारयामासपुरोधोभ्यां॥अत्रांतरे॥तत्कालयोग्यमंगलगीतिकांपपाठतदुचितोजनः॥तथाहि॥याःप्रोक्ताः
५३ स्करयारिजातहरणेयाभूमिजोन्मूलनेयाःकंसस्यनिवर्हणेकुवलयापीडस्ययाःसंकृतो॥ताभिःसप्रतिनूतनेतरगिरांश्रेणी
भिराशास्महेकल्याणंकमनीयनिरजदृशोःपद्मावतीकृष्णयोः॥१४॥कोऽप्यस्तिख्यातिसुंदरःस्मरइवस्वैरंशचीवल्लभयोर्हर्यक्षग
दापनोदनपटुर्विश्वंभरानंददः॥लक्ष्मीवत्क्षितिपालशौरिकृतयोःपाणिग्रहेमंगलंदद्यात्पन्नगराजशैलवसतिःकोऽप्यवतारो
हरिः॥१५॥तिर्यक्तिर्यगयांगपंक्तिवलनव्यक्तत्रपामिश्रितस्मेरास्यद्युतिसूचितस्वर्णकृतानेगातिरेकक्रमा॥सानंदाकूदितस्तभ्यस्तु
यकवचोलीकप्रकोपावहिःपार्श्वस्थाकमलाविवाहसमयेदद्याच्चिरंमंगलं॥१६॥लेखालीभिरलंकृतोविधिरिवप्रेंखत्प्रवालच्छवि
र्वाणीहस्तइवातिपल्लवकुलप्रेंखत्प्रशाखाणिक्यवत्॥पद्मोल्लासकरस्तथाहरिरिवश्रीश्रीनिवासप्रभोःपादःकृष्णधियन्नृपालसु
तयोःकुर्यान्महन्मंगलं॥१७॥इति॥अथसंप्राप्तेमुहूर्तेसावधानेनस्थेयमितिभणतिपुरोधोद्वये॥वादयतिघंटांग्रामगणके ५३
वाद्यमानेषुतूर्येषु॥गायंतीषुनानादेशभाषाकुशलासुचिरंटीषु॥पठत्सुविविधमंत्रान्ब्राह्मणेषुआकाशभूषेपि॥आनंदामृत

ससेमज्जन्मानसे॥ पद्मावतीदेवीस्वांजलिकलितत्तंदुलान् श्रीनिवासस्यमौलावाक्षिपत्॥ देवोपितस्याः॥ अत्रांतरे॥ राजपु
त्र्याः सखीमदनकलिकाधराम वोचत्॥ देविपश्यपश्य॥ नानारत्नमयाइवाभ्रभयाश्रीवज्रेरेखान्विताः किंचैतेप्रमदाश्च
नीलमिलिताः सच्चंद्रकांताः पुनः॥ लक्ष्मीनायकमस्तकेवरमणीरत्नेडितास्तंदुलामुक्तास्तेतुकरप्रवालललिताङ्कपद्मरा
गान्विताः॥१८॥ ततः प्रथमंदेवोदेवीमलोकयत्॥ यस्याः वदनमिवकमलंयल्लोभनीयंनयनयुगलंनयनकमलद्वंद्वस्कंद
रंवदनं॥ कुचकुंभीवघनघटाकारमंजकलशकुंतलालीकुंतलालीवसारंगत्तपादयिनीकुचयुगली॥ किंच॥ कटाक्षः सतीक्ष्णो
पिकस्मः॥ कुचभारः पर्वतस्वरूपोपिगुरुः॥ अपिच॥ मौलिर्वक्रकचोद्भासिता॥ कटाक्षः नवक्रकचोद्भासितः॥ केशर्यरविं
दस्कंदरंनयनमरविंदस्कंदर॥ स्वशोभितोमध्यभागः नखशोभितः पाणिः॥ यस्कघासदर्शांजयनंनयस्कधासदृशोधररसः
यदरसन्निभंवदनंनवदरसभिभंकंठस्थलमंदोमुग्धभावः॥ अशनिर्वियोगः॥ अनंतरस्तापितमपश्यत्॥ यश्चाकारेणप्रता
पेनस्मरविद्वेषी॥ यस्यचवदनेराष्ट्रेचद्विजाः मुक्तोपमाः॥ यस्यच वाहनंकरवंचद्विजराजः॥ यस्यचामीकरोज्वलाः कजाः

उपस्कराश्च यस्मिन्न क्षतिक्षितिं॥ चित्रभित्तिश्चंद्रशालासु॥ बंधं दर्शनं विदग्धकस्य मंडने॥ पयोधरच्छेदः शारदे॥ किंच॥ प्रसूनानु
५४ रक्ताः भृंगाः न जनाः॥ अमानोन्नो वासिताः स्कन्ददोनवाचः॥ विप्रसवो वासिताः देशाः न स्त्रियः॥ मत्कुणभूषिताः गजशालाः न
कुड्याः॥ अस्त्वेतत्॥ शश्वद्यः स्फुरत्सोर्मिकः कमलिनीवर्गेन विस्मापयेत् तस्याणिश्चतदीक्षणव्यतिकरो रागानुबंधोज्वलः॥
स्त्रीचक्रे कमलापतिस्तदुभयं पूर्वं विबंधस्त्वयं कामार्तः किल साहसादिव गले मांगल्यसूत्रं ततः॥ १९॥ ततश्चातिक्रांते लाजाहोम
विधौ विधियज्ञपालः सादरं श्रीनिवासमजीगदत्॥ आशैलाचलमासमुद्रममरक्ष्मापाल्यया द्राविडक्षोणी सा शवरथेभपति वसुंमद्रा
ज्यं सकोशायुधं॥ अन्यत्किंचिद्विप्रमीदेयमवनो देहश्चयेवाधवाः सर्वं ते यसमर्पितं तदधुना त्वन्मुद्रयामुद्रितां॥ २०॥ किंच॥ वरा
हदेवो नागतः॥ प्रायेण भूसुरतयामपि साम्यसूय इति भाति॥ अथ च्यागतेषु यथाविभवं यथोचितं सर्वेऽपि सन्मानिताः॥ शेषाय कृ
तुकं॥ इंद्राय चामरश्रीः॥ चंद्राय च नक्षत्रमाला॥ दत्ता॥ अन्येऽपि च देवाः सुमनसो जाताः॥ परं केवलं जातिहीन इत्यकृत्या ५४
त्वसंतः असुमनाः जाताः॥ शेषः दीर्घपृष्ठ इत्यकृतत्वाद्रहितो वासितोभूत्॥ बहुभक्षणोद्देश्यानरः सहेतिजर्जितः॥ तत्र म

मकोवापराधः॥अपिच॥देवस्यपुत्रीगंगानलिनीवामाकृतीयासंदेहोनगतः॥अन्यच्च॥कश्चित्कालमत्रैवस्थितेनदेवेन
भवितव्यमितिश्रुत्वा॥देवोपिकिंचित्स्मेरवदनःप्राह॥आर्यमिनवसाऽत्रैवएनस्थितंजानातुभवानधनाद्यानुजानातु॥वराहदेवा
भिवंदनाययामिशेषाचलमिति॥उक्त्वाच॥कथंकथमपिअभिनवकन्यावियोगदुनौधरागिरिवङ्कपालौसांत्वयसपरिवारस्ते
नाशास्तःपश्चात्स्वयास्सहनिर्गत्यअगस्त्याश्रममासाद्य॥गरुडवर्जसर्वामरगणाननुज्ञाप्यफणींद्राचलमगमत्॥तावुभौश्ला
घ्यस्वरत्नौसततंप्रमदेनोज्ज्वलौ॥श्यामौपद्मावतीकृष्णौरेमातेपन्नगाचले॥२१॥श्रीनिवासोऽप्यविद्वाल्लक्ष्मीकारान्कटकादिका
न्॥कदाचिद्वेंकटेशायश्रेष्ठमेवहिदत्तवान्॥२२॥सत्कविनानेनयथाऽपरुषाक्षरमित्रभावकृतेन॥जननाशकविताससतं
वेंकटभूपाचंद्रेण॥२३॥गुरुगुरुकृपयायंदुस्करंस्तोकलोकैःप्रकटितनिजकीर्तिःसादरंवेंकटेशः॥चिरसमयमुदृदिस्वंपू
रयत्काव्यमेतत्कविरिवचतदिष्टंश्रीनिवासःकृतार्थः॥२४॥इतिश्रीमत्कृष्णकाव्यपारावारपारगमननौकायमानचरणाभि
वंदनंनकंठीरवाचार्यस्कृरितहीरातेवास्यन्यतमस्यअक्षिपृष्टिपुरचनापटोःस्वकीर्तिकदंबधवलितदिग्भित्तिवेंकटाग

रिनिवा[illegible]वेंकटक्षमापालयुगुलाश्रितस्यअप्रयासापादितशास्त्रकलस्यकविमडाकशिशोः देशिकचरणसरसीरुहसम
५५ र्पितनिजसुकृतस्यवेंकटेशस्यकृतिषुपूर्वश्रीनिवासविलासोनामश्लेषोत्तरकाव्यबंधः पर्याप्तः पंचमोल्लासः ॥५॥ श्रील
क्ष्मीवेंकटेशार्पणमस्तु ॥ श्रीहरिदैशिकपदसरोजयोः सादरं शान्तं शान्तनतयोर्विलसंतुतरां ॥ वसुबाणर्षिभूशाकेदुर्मुखेतेषके
शुभे ॥ पंचम्यांसौम्यघस्रेतुमध्यान्हयामेतृतीयके ॥ जनस्थानस्थरवावासरामचंद्रभटकाळेनिर्मळकरेणलिखितं ॥ श्रीनिवास
विलासाभिधेयग्रंथईमुत्तमं ॥२॥ शके १७७९ पिंगलनामसंवत्सरेशालिशकेतोमासोत्तमेमासेमाघमासेकृष्णपक्षे १५ तिथौ
तद्दिनेग्रंथसंपूर्ण ॥ अथग्रंथसंख्या १५२२ ॥ ॥ श्रीरामचंद्र ॥ ॥ श्रीः ॐ ॐ